M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Rel.

Ser. 1190

Title: Tripindi Vidhan Prayoga

1190

Complete

	Tripuridi Vidhan Prayoga	Title
	Krishna Kelkar	~~Author~~ Scribe
		Editor
8C		Year, Vols.
		Publisher
1190		Remarks

।।अथ सपिंडीश्राद्धः।।

त्रि॰ पिं॰ १

अथ त्रिपिंडीविधानप्रयोगः॥ तीर्थं गत्वा शुचिः स्नातः कृतमाध्याह्निकक्रियः स्थलमकल्पये
द्गोमयेनोपलेपयेत्॥ अथ विष्णुपूजनं देशकालौ स्मृत्वा उपवीती त्रिविधानां दिवि
स्थानां अंतरिक्षस्थानां भूमिस्थानां अज्ञातनामगोत्राणां सात्विकराजसतामसानां
प्रेतानां मोक्षार्थं मम आरोग्यार्थं संतत्यादिप्रतिबंधनिवृत्त्यर्थं च त्रिपिंडीश्राद्धे अधि
कारसिद्ध्यर्थं महाविष्णोः पूजनमहं करिष्ये। शालग्रामोपरि पुरुषसूक्तेन पूजां कु
र्यात्॰ सहस्रशीर्षेति १६ सूक्तस्य नारायणः पुरुषोनुष्टुप्॰ विष्णुपूजने विनियोगः॥
सहस्रशीर्षेत्यावाहनं अनेन प्रकारेण षोडशार्चेन षोडशोपचारैः पूजां कुर्यात् त[illegible]आ
द्यो यवमयः पिंडो द्वितीयो व्रीहिसंभवः। तृतीयश्च तिलैः कार्य एवं पिंडत्रयं [illegible]॥
तेयं कृत्वा ब्राह्मणान्निमंत्रयेत्॰ ततो निमंत्रयेद्विप्रान् स्नानदंभवर्जितान्॥
सदाचारान्पुत्रवतो वेदवेदांगपारगान्॰ इति एकोद्दिष्टत्रयात्मकं त्रिपिंडिश्राद्धं १
भवति॰ अत्र एवं सर्वत्र इदं श्राद्धं महालयवत् सर्वत्र निमंत्रणं दिविस्थानां सात्विका

नां अज्ञातनामगोत्राणां प्रेतानां स्थाने ब्राह्मणं दत्वा भवद्भिः प्रसादः कर्तव्यः अंतरिक्षस्था
नां राजसानां अज्ञातनामगोत्राणां प्रेतानां स्थाने॰ भूमिस्थानां तामसानां अज्ञात॰
स्थाने क्षण॰ एवं ब्राह्मणान्निमंत्र्य उपवेश्य पुनर्देशकालौ संकीर्त्य त्रिविधानां सात्विकरा
जसतामसानां अज्ञातनामगोत्राणां प्रेतानां मोक्षार्थं मम आरोग्यार्थं संतत्यादि
प्रतिबंधनिवृत्त्यर्थं एकोद्दिष्टविधिना पिंडत्रयात्मकं श्राद्धत्रयं तंत्रेण करिष्ये। सप्तव्या
धेति मंत्रेण प्रोक्षयेदुपकारकं। मंत्रः सप्तव्याधा॰ मानसे इति मंत्रेण सर्वाणि श्रा
द्धद्रव्याणि प्रोक्ष्य ततः मधुवाता ऋतायते चं जप्त्वा त्रिर्जपेन्मधु माध्वीति॰ ततः तिलोदका
दि मुद्राचश्राद्धकारिणोत्यं तं प्राचीनावीती पुनः त्रिविधानां निवृत्त्यर्थं त्रिपिंडीश्राद्धं
मकर्तुमे अधिकारः॰ अपसव्यं॰ त्रिविधानां॰ करिष्ये॰ इत्येतं पूर्ववत्। ततः पूर्वस्थानि द
त्वा वर्तुलं मंडलं कृत्वा गंधादि निक्षिप्य दिविस्थाः सात्विका अज्ञातनामगोत्राः प्रेताः स्वा
गतं॰ दिविस्थाः॰ प्रेताः॰ भूर्भुवः स्वः इदं वः पाद्यं॰ शंनोदेवी॰ अंतरिक्षस्थाः राजसा अ
ज्ञाः॰ प्रेताः स्वागतं॰ गंधादि पूर्ववत्। भूमिस्थाः तामसाः अज्ञाः॰ ताः स्वागतं गंधादि॰

श्री.डी. २

दिव्यंतरिक्षभूमिस्थाः प्रेताः स्वधा अन्नविश्रामः पूर्ववत् ० थोपस्करं तं त्रिपिंडीश्राद्धमहं करि
ष्ये प्राचीनावीती ० अपहता असुरा रक्षांसि ० तेनोर्वं तु अज्ञातनाम गोत्रेभ्यः प्रेतेभ्यः इदं विष्णु
इदं हव्यं पाकं प्रोक्षणं तं प्राचीनावीती ० दिविस्थानां अज्ञात ० तं प्रेतानां भूर्भुवःस्वः इदमासनं ० अंत
रिक्षस्थानां राजसानां अज्ञात ० तं प्रेतानां भूर्भुव ० भूमिस्थानां तामसानां अज्ञात ० पूर्ववत् ० अत्रास्य
तां दिवि ० स्थानां सात्विकानां प्रेतानां स्थाने क्षणः क्रियतां ० अंतरिक्षस्थानां राजसानां स्थाने ० भू
मिस्थानां तामसानां स्थाने क्षणः ० ॐ तथेति ० एकार्घं कृत्वा पवित्रं कृत्वा पात्रत्रयं आसाद्य शन्नोदेवी
रित्यादि पुष्पाक्षता ... तं एकोद्दिष्टे आवाहनं नास्ति ० उपवीती ० दिविस्थाः सात्विकाः अ
ज्ञात ० ग्राः भूर्भुवस्वः इदं वो अर्घ्यं ० अंतरिक्षस्थाः राजसाः अज्ञात ० भूर्भुव ० भूमिस्थाः ता
मसाः अज्ञात ० भूर्भुव ० यादिव्या इति सर्वत्र ० पात्राणां न्युब्जीकरणं नास्ति ० प्राचीनावीति ० अर्घ्य
दानवत् गंधादि आच्छादनांतं विभज्य योज्ञातव्याः उपवीतानि दत्वा ० सात्विक राजस तामसेभ्यः
एते अन्नगंध ० तमच्युतं ० आदौ मधुरत्रय युतं पिंडत्रयं कृत्वा पूर्ववन्नक्त ... पूर्वोच्चरित ०
योनिविधानं निर्दिष्टं पिंडप्रदानमहं करिष्ये ० दक्षिणाभिमुखं सव्यं जान्वाच्य ० अपसव्यं ० २
अपहता इति लेखा मुल्लिख्य कुशानास्तीर्य इति ... पितृवंशोत्पन्न ० मम ० तिलोदकमयादत्त

मक्षय्यमुपतिष्ठतां इति श्लोकत्रयेण रेखोपरि तिलोदकं दत्वा ततः यवमयपिंडं स्पृष्ट्वा
मधुवाता इति त्रचं जपित्वा पिंडमादाय पितृवंशे ० कुले मम ० धर्म पिंड ० तां ० एवं श्लो
कं पठित्वा । इमं यवमयं पिंडं मधुत्रय संयुतं । ददामि तस्मै प्रेताय यः पीडां कुरुते मम
ये केचित्प्रेतरूपेण वर्तंते पितरो मम । यवपिंडप्रदानेन ते लिंगछंतु शाश्वतीं । ये केचिद्दिवि
रूपेण प्रेताः सात्विकरूपिणः । सात्विका पिंडदानेन तृप्तिं गच्छंतु ते क्षयं दिविस्थाः सात्विका
अज्ञात ० ग्राः प्रेताः एष यवमयपिंडो अक्षय्यमुपतिष्ठतु इति पिंडं दद्यात् । तामस्त्रिमरेखां
रणं कुशास्तरणं पितृवंशा इति श्लोकत्रयं पूर्ववत् उल्का तिलोदकं दत्वा व्रीहिमयपिंडं स्पृष्ट्वा मधुत्र
चं जपित्वा पिंडमादाय पितृवंशा इति श्लोकत्रयं पिंडदानवत् ० ततः इमं व्रीहिमयं पिंडं मधुत्रय
संयुतं तम्मुखं ददाम्यपि पीडां ये कुरुते मम । ये केचित् ... रूपेण वर्तंते पितरो मम । तेन
पिंडदानेन ... गतिमुत्तमां । अंतरिक्षे ये केचित् राजसा वायुरूपिणः । राजसा पिंडदानेन ते
तृप्तिं तु मुदान्विताः । अंतरिक्षस्था राजसाः अज्ञात ० प्रेताः एष व्रीहिमयपिंडो अक्षय्यमु
पतिष्ठतु इति पिंडं दद्यात् । तमस्त्रिमरेखा करणं कुशास्तरणं पितृवंशा इति श्लोक

त्रि.श्रा.
३

अर्यं पूर्ववदुत्कानि लोदकं तिलपिंडं स्पृष्ट्वा मधुत्रयं जपेत् पिंडमादाय पितृवंशे इति श्लोकत्र
यं पठित्वा । ततः इमं तिलमयपिंडं मधुना सर्पिषा युतं । तेभ्यो ददामि ये पीडां मत्कुले कुर्वते स
दा । ये केचिन्नाम मत्ताः प्रेताः भूमौ तिष्ठंति सर्वदा । तिलपिंडप्रदानेन गतिं गच्छंतु ते ध्रुवं । तमाऊ
त्माय ये केचिद्दूतं ते पितरो मम । पिण्याकपिंडदानेन ते तृप्यंतु क्षुधार्दिताः । भूमिस्थाः ता
मसा अज्ञाततः प्रेताः । एषा तिलमयपिंडो ह्यक्षय्यमुपतिष्ठतु । इति पिंडं दद्यात् । अत्र पितरो मादय
ध्वमिति प्राणायामं कृत्वा । आचांतः पवित्रे धृत्वा प्राचीनावीती । पितृवंशे इति श्लोकेन
येणात्रिषु पिंडेषु प्रत्येकं दत्वा । दिविस्थाः प्रेताः अप्य ऊर्ध्वं । एवं अंतरिक्षस्थाः प्रेताः अंजने
न अभ्यः ऊर्ध्वं । इति विशेषः । त्रिषु पिंडेषु एतद्गुः पि. ऊर्ध्वं । इति मंत्रावृत्त्या सूत्रं दद्यात् । कु
लाभिवृद्ध्यै । त्रिपिंडसंस्थेभ्यः सात्विकराजसतामसेभ्यः प्रेतेभ्यः गंधादिदक्षिणांतां
पूजां । नमो वः पितर इत्युपस्थाय । अर्घ्यदानं कुर्यात् । हस्ताग्रे गंधोदकं पुष्पाणि प्रक्षिप्य
तस्मिन्मातुलिंगानि स्थापयित्वा उपवीती । दिविस्थाः प्रेताः मातुलिंगफलं इदं अर्घ्यं स
मर्पयामि इति यवपिंडोपरि अर्घ्यं दत्वा । पुनः हस्ताग्रादि जंबीरफलानि अंतरिक्ष ३
स्थाः जंबीरफलानि इदं मः मीति व्रीहिपिंडोपरि अर्घ्यं दत्वा । पुनः हस्ताग्रादि उर्वरः

भाषया खर्वारिकाः

स्थाः पृथिव्यां भूमिस्थाः प्रेताः उत्तत्तीभिः इदमर्घ्यं । तिलपिंडोपरि अर्घ्यं दत्वा एवमर्घ्यदानं विधा
य तर्पणं कुर्यात् । ताम्रपात्रे जलमिश्रितदुग्धचंदनं प्रक्षिप्य पिंडानां समीपे स्थित्वा मोपस्थि
त्वा दक्षिणाभिमुखे तर्पणं कुर्यात् । पूर्वांते । पिंडे विष्णुतर्पणं करिष्ये । प्यादि पूर्वे
मे वो तं तर्पणे विनियोगः । पुरुषस्तेन विष्णुं तर्पयामीति विशेषः ।
तर्पणमेकवारमित्यनुष्ठानं । अथ प्रार्थना । अनादिनिधनो देवः शंखचक्रगदाधरः । अक्ष
न य्यः पुंडरीकाक्षः प्रेतमोक्षप्रदो भव । अतसीपुष्पसंकाशं पीतवाससमच्युतं । ये नमस्यंति गोवि
दं न तेषां विद्यते भयं । कृष्ण कृष्ण कृपालुस्त्वमगतीनां गतिर्भव । संसारार्णवमग्नानां प्रसीद
पुरुषोत्तम । नारायण सुरश्रेष्ठ लक्ष्मीकांत वरप्रद । अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव । यः के
ष्विद्धनलोभेन मत्तं [illegible] प्राप्नो नराधमः समे प्रीतः सुखं दद्यात् स्मेदुग्धं तिलोदकं । धन
लोभेन्मत्ता ये च सर्पयोनिव्यवस्थिताः । समे प्रीतः सु० एवं तर्पणं विधाय पिंडेषु नमस्कारं त
तः परतनेति । अस्मत्कुले वंशवर्द्धतामिति यजमानः स्वस्ति वर्द्धतामिति ब्राह्मणाः सुप्रदत्तमस्तु पा
पिंडानामुद्वासनं करिष्ये इति तद्विलोरित्यादि तिः तुष्टिरस्तु अस्तित्वं ते आशाल

त्री·डी
४
दोहास नांतं पिंडानां स्थापयित्वा मस्य स्य त्वा · युष्मदनु न्त या पा · त्रा सादनं करिष्ये । ओदनेन पा
णि होमं प्रत्येकं कृत्वा मूर्ध्नानं दिव इत्यादि मधुपाय समाधान्नं कुसराच्चाग्निरुपरि विष्य कुतत्रेषं
षैश्रा त्वपयान्न त्रयं दत्वा गायत्र्याभ्युक्ष्य · पृथिवी ते पात्रमित्यादि · छायेयं · दिविस्थेभ्यः सात्विके
भ्यः अज्ञात · त्रे · भ्यः प्रेतेभ्यः इदंमन्नपायसादि अन्नं यथा सोपस्करं सहितं तत्सलिलान्नं च मोद
नतीर्थे दत्तमक्षय्यमस्तु । एवं राजसे तामसेभ्योः ये चेह पितर इत्यादि · उच्छिष्टपिंडं शुद्ध आचमनां
तं कृत्वा विकिरदानं असंस्कृतप्रमी · स्तुपोक्षितमस्त्वित्यादि भोजनपात्राणि चालयित्वा दिव्यं
तरिक्षभूमिस्थाः स्वस्तीति ब्रूत । पश्चात्तं उद्दिश्य यद्दत्तं त्रिपिंडी श्राद्धीयमन्नमुदकादि तदक्ष
य्यमस्त्विति · एवं राजसतामसयोः उपविष्टाभ्यो ब्राह्मणेभ्यः श्राद्धसांगुण्यं दिविस्थेभ्यः प्रेते
भ्यः इदं वस्त्रं दक्षिणाः पांतु । अंतरिक्षेभ्यः प्रेतेभ्यः अयं कमंडलु दक्षिणाः पांतु । भूमिस्थेभ्यः प्रे
तेभ्यः उपानद्वयं दक्षिणाः पांतु । स्वधां वाचयिष्ये इत्यादि · ओं स्वधेत्यं तां प्रार्थना । दिव्यंतरि
क्षभूमिस्थाः सात्विकाराजसास्तथा । प्रेताश्च तामसा ये च ते तृप्तिं यांतु तर्पिताः । इति प्रार्थना । ततः
त्रिपिंडी श्राद्धसांगुण्यार्थं आचार्याय हिरण्यदानं दद्यात् । गोदानादि दानानि कुर्यात् । यस्य स्मृत्ये
ति · इति त्रिपिंडी श्राद्धविधिः । अथ त्रिपिंडी विधिः । तार्क्ष्य उवाच । देवदेव जगन्नाथ लोकानां हित ४

काम्यया । और्ध्वदैहिकमाख्यातं प्रेतमोक्षस्य साधनं । नारायणबलिः ख्यातः स्तथा पु
त्तलको विधिः । विधिहीना विदग्धानां विशेषेण मरणे सति । यस्य तं त्वं यथाख्यातं तथा दुर्मर
णे सति । तथापि जंतवः केचित् दुर्गतिं समुपाश्रिताः । स्वकुले तु प्रजातानां पीडां कुर्वंति दारुणां ।
न तेषां वियते स्वामिन् घृणा वापि दया तथा । कथयस्व प्रसादेन तेषां मोक्षः कथं भवेत् ।
किं कार्यं स्वकुलोत्पन्नैः ब्रूहि देव पुरुषोत्तम । गयायां तु मया ख्यातं प्रेतस्थानीलवि मोक्षणे । किं कुर्युः
स्तं जगन्नाथ ह्येतं मे तत्त्वतो वद । भगवानुवाच । शृणु सम्यक् प्रवक्ष्यामि यत्त्वया पृष्टमेव या
न यामेन मोक्षकरं कर्म लोकानां सुखदायकं । यस्य स्मरणमात्रेण प्रेतपीडा न जायते ।
करिष्यामीति संकल्प्यात्तमोक्ष मया पुरा । कस्य चित् कस्यचित् दाख्यातं गोपनीयं प्रयत्नतः ।
रहस्यं परमं वित्सस्त्वं सत्वं खगेश्वरः । पिंडत्रयात्मकं कर्म तव वक्ष्यामि सांप्रतं । प्रेतानां नृ
प्तिजननं लोकानां सुखदायकं । तार्क्ष्य उवाच । भगवन् को विधिस्तत्र किं दानं कोत्र पूज्यते ।
सर्वं विस्तरतो ब्रूहि दयालुस्त्वं ममोपरि । भगवानुवाच । आद्यो यवमयः पिंडो द्वितीयो
व्रीहिसंभवः । तृतीयश्च तिलैः कार्य एवं पिंडत्रयं खग । यवादि विष्टमप्रवक्त्वा

विष्णुमयं स्मरेत्॥ अज्ञातनाम गोत्राणां सालिग्रामादिशिलोदकैः॥ एवं कृते खगश्रेष्ठ पीडान
वि॰ दी॰ ५ श्यति तत्कुले। आयुष्यं वर्द्धते नित्यं नात्र कार्या विचारणा। न्यूनाधिकं न कर्त्तव्यं
कृतं कार्यं च सिध्यति। वित्तशाठ्यं न कुर्वीत सत्यं सत्यं न संशयः॥ एतत्ते स
र्वमाख्यातं यत्पृष्टोऽसि पुरा खग। कल्याणं वै सदा प्राप्य यथाख्यानं प्रजा
प्यहं॥ इति मूलवचनानि। अन्यानि मूलवचनानि प्रयोगरूपाणि ज्ञात
व्यानि॥ ॥ इदं पुस्तकं केककरोप नामकेन छिनलिखितं॥ ॥